I
516
6
MARAJEN
LIBRARY
FORT, BANGALORE.

330

ಆಗರೂರಯ್ಯಂದ ಖರೀದಿ

Acc. No. 4478
6-7-56

R. 108

Sri Chamarajendra
Veda Maha Patasala
Bangalore.



I - 1916.
ಹೊಟ್ಟುವಳಿ ಸಂಖ್ಯೆ.....

अवतरणिका ।

अधुना प्रकाश्यमानानां कृतीनां कवयितुः श्रीमतो वेङ्कटरायसूरेः वंशः, जीवितकालः, तदुदन्तश्चेत्यादिकं हरिवंशचम्पोरादिभागे यथावदुपावर्णि। ततोऽत्र तेषामेव वचनं पुनरुक्तं माभूदिति तत एव तत्सर्वं प्रतिपद्यतां विवित्सुभिरित्यत्र प्रकाश्यमानयोः समवृत्तमाला-नौकाचरित्रयोरितिवृत्तमात्रं किञ्चित्प्रस्तूयते ।

श्रीमद्भिः पिङ्गलादिभिराचार्यैः विस्तृत्य निरूपितस्य केदारान्तर्वाणिप्रमुखैः संगृहीतस्य च वैदिक-लौकिक-सम-विषमादिभेदभिन्नस्य छन्दसो विस्तरेण निरूपणं तैरेव कृतकरत्वात्, नातिप्रयोजनमिति मन्यमानः लौकिकानां उक्तादि छन्दोभवानां वृत्तानामुदाहरणमात्रमेकैकेन श्लोकेन सौव्वतत्कौशलप्रकाशनाय दिदर्शयिषुः समवृत्तमालानामकमिमं ग्रन्थं प्रणिनाय ।

नौकाचरित्रस्य तु इतिवृत्तं हरिवंशचम्पोरवतरणिकायां तदीयसाहित्यसम्मत्तिविवरणावसरे साधुनिरूपितमिति नात्रप्रतन्यते । अनयोः कृत्योः गुणज्ञाः महान्तः प्रकाशकमहाशयं श्रीमन्तं वेङ्कोबरायशर्माणमभिनन्दन्तुतरामित्याशास्ते ॥

सज्जनविधेयः,

मैसूरु
२२–१०–१९२३.

पण्डितरत्नं रा. राघवेन्द्राचार्यः,
महाराजास्थानधर्माधिकारी,
अनुभूतपूर्वराजकीयप्राच्यकोशागार-
प्रधानपण्डिताधिकारश्च ।

330

SRI CHAMARAJENDRA SANSKRIT COLL.
वाणीं भजत गैर्वाणीं
LIBRARY
FORT. BANGALORE.
Veda Maha Pathsala
Bangalore.

ॐ

॥ श्री श्रीनिवासाय नमः ॥

—:समवृत्तमालाप्रारम्भः:—

१—उक्ताछन्दसि,

(१) श्रीवृत्तम्— श्रीशः। स्वं नः ॥ १ ॥

२—अत्युक्ताछन्दसि,

(२) स्त्रीवृत्तम्— लक्ष्मीजानेः। नान्यं जाने ॥ २ ॥

३—मध्याछन्दसि,

(१) नारीवृत्तम्— पूर्णत्वादीश त्वाम्। कः स्तोतुं दक्षःस्यात् ॥ ३ ॥

(२) मृगीवृत्तम्— सर्वतो भावना। श्रीपतेरस्तु ते ॥ ४ ॥

४—प्रतिष्ठाछन्दसि,

(१) कन्यावृत्तम्— श्रीशस्याङ्घ्रौ वासः श्रेयान्।
तस्माच्चेत स्तुच्छं मा गाः ॥ ५ ॥

५—सुप्रतिष्ठाछन्दसि,

(१) पङ्क्तिवृत्तम्— मामकचेतः खिद्यति नाल्पे।
खेलति नित्यं श्रीशपदाब्जे ॥ ६ ॥

६—गायत्रीछन्दसि,

(१) सोमराणी— असद्वार्तयाऽलं वद श्रीविलोलम् ।
सदैवार्तपालं मुदा मुक्तिमूलम् ॥ ७ ॥

(२) तनुमध्या— चेतस्स्मर पूतं धातृस्मरतातम् ।
नन्दप्रियपोतं तं सद्गुणजातम् ॥ ८ ॥

(३) कामतिलका— श्रीश जयतस्ते हंसवरयुक्ते ।
मामकहृदब्जे चारुचरणाब्जे ॥ ९ ॥

(४) शशिवदना— स्मरहरसेव्यं मुरहरसंज्ञम् ।
किमपि महो नः कलयति मोदम् ॥ १० ॥

(५) स्रग्विणी— त्वत्पदे भ्राजते मन्मनो भृङ्गवत् ।
त्वं च नो मानसे श्रीनिधे हंसवत् ॥ ११ ॥

(६) सोमकुलम्— दत्तात्रादिपदं ध्यातं श्रीशपदम् ।
दद्यान्नः स्वपदं सर्वाभीष्टपदम् ॥ १२ ॥

(७) वसुमती— कृष्णं नतिमतां कल्पक्षितिरुहम् ।
दत्ताभयमहं ध्याये नरहरिम् ॥ १३ ॥

७—उष्णिक्छन्दसि,

(१) मदलेखा— लक्ष्मीनाथ कृपाळो याचे त्वाऽद्य नतस्ते ।
भक्त्या दास्यमजस्रं दत्वा मामव भृत्यम् ॥ १४ ॥

(२) कुमारललिता— स्मृतौ विधिनिषेधौ श्रुतावपि न साधु ।
रमेश चरणौ ते सदैव शरणं नः ॥ १५ ॥

(३) चूडामणिः— संसारसागरतो भीतोऽहमादरतः ।
भक्तेष्टदानचणं भक्त्या भजामि हरिम् ॥ १६ ॥

(४) हंसमाला— अयुतार्कभमूर्तिर्द्विभुजा वामनस्य ।
स्फुरतु प्रातरन्तःकरणे मे सदैव ॥ १७ ॥

(५) मधुमती— स्मर जलदरुचं हरिममृतमुचम् ।
दरहसितरुचा विजितहिमरुचम् ॥ १८ ॥

८—अनुष्टुप् छन्दसि,

(१) विद्युन्माला— मुक्तामुक्तब्रह्मेशाद्यैः नित्यध्येयं भक्तिज्ञेयम् ।
लक्ष्मीशाख्यं लक्ष्मीकुर्मो विद्यावेद्यं वस्तु ह्याद्यम् ॥

(२) वितानमध्या— भजे गजेन्द्रार्तिभेत्तुः भुजे द्विजेन्द्रस्य सक्तम् ।
मुदा चिदानन्दमूर्तेः सदा पदाम्भोजयुग्मम् ॥२०॥

(३) सिंहलेखा— नौमि नव्यमेघभास्वद्योगिभाव्यविग्रहम् ।
शारदाब्जगर्वलोपि क्षेमदाङ्घ्रिमब्जनाभम् ॥ २१ ॥

(४) चित्रपदा— हा भवतो भवतोऽन्यः को न्वविता भक्तिता नः ।
केशव तं तव भृत्यं माधव मामव नित्यम् ॥ २२ ॥

(५) हंसरुतम्— चेतोभृङ्ग सुखहेतोः नित्यानन्दमकरन्दम् ।
नित्यं याहि शिवसेव्यं श्रीलक्ष्मीशचरणाब्जम् ॥

(६) प्रमाणिका— रविस्फुरन्मणिप्रभाविभासितोरुवक्षसम् ।
दरस्मितोपशोभिताननेन्दुमच्युतं भजे ॥ २४ ॥

(७) नाराचकम्— अत्यद्भुतं महाद्भुतं तत्त्वं ध्रुवं यदाः प्रभो ।
स्वप्ने मम ह्यभादृशोरग्रे महः कविप्रभम् ॥२५॥

(८) **माणवकम्**— गोपवधूवक्त्रविधुव्यूहलसन्मोहमणेः ।
अङ्घ्रिनखज्योतिरहो सत्यमिदं स्वप्नगतम् ॥ २६ ॥

(९) **समानिका**— भानुकोटिदिव्यरूप तावकी दयाऽद्भुतैव ।
यत्पदाब्जसन्नखाग्रमस्मदक्षिलक्ष्यमास ॥ २७ ॥

९—बृहतीछन्दसि,

(१) **भुजगशिशिभृता**—सदयहरिसुधासिन्धोः स्मितशिशिरकटाक्षोर्मीः ।
भवमरुभुवि खिन्नं मां श्वसन गमय शीघ्रेण ॥ २८ ॥

(२) **गुर्वी**— प्रणम्य नृहरेऽर्थये त्वां प्रसीद मयि भोः कृपाळो ।
सदैव मम हृत्सरोजे वसेह रमया सुखेन ॥ २९ ॥

(३) **भद्रिका**— विष्णुरत्र हृदये मम व्योमगो विजयते ध्रुवम् ।
तत्पदी सरति मन्मुखाद्वीरिति भ्रमति तां जनः ॥

(४) **मणिमयम्**— श्रीश तव कारुण्यसरिन्निस्सरति निस्सीमगतिः ।
साधु मयि नो चेन्मम किं वागमृतकुल्यैव भवेत् ॥

(५) **हलमुखी**— श्रीश ते चरणयुगळं चेतसो भवतु निगलम् ।
ध्यायतो मम तत इतो धावतोऽतिचपलतया ॥

१०—पङ्क्तिछन्दसि,

(१) **पणवम्**— शक्तानां विषय विरक्तानां
भक्तानां भवभयमुक्तानाम् ।
युक्तानां स्मितमधुसिक्तानां
पादाब्जे तव न च मुञ्चामः ॥ ३३ ॥

(२) **मयूरसारिणी--** वल्लवीकुचान्तरालभास्व-
द्दिव्यकुङ्कुमानुरञ्जितं यत् ।
सर्वदैव सत्सुखाय चेत-
श्चिन्तयाच्युताङ्घ्रिपल्लवं तत् ॥ ३४ ॥

(३) **चंपकमाला--** पान्तु विशालाः पत्रविनीला
यामुनवेलापुण्यतमालाः ।
नन्दसुबालनिङ्गजलीला-
साक्षिसुनीलक्ष्मातलमूलाः ॥ ३५ ॥

(४) **मत्ता--** चेतोभृङ्ग त्यज भवसङ्गं
चिन्तातन्तौ न हि भज भङ्गम् ।
ज्ञात्वा नित्यं भज सुखपूर्त्यै
ज्ञानानन्दद्युतिबलसारम् ॥ ३६ ॥

(५) **दीपकमाला--** दारसुताद्यैः स्वार्थशोचिभिः
देहवियोगे किं नु मे भवेत् ।
प्राणसखो मां पाति योऽनिशं
पार्थसखं तं प्रत्यहं भजे ॥ ३७ ॥

(६) **मनोरमा--** रहसि यो रमाभुजान्तरे
स्फुरति साऽपि यद्भुजान्तरे ।
अलितट्टिदञ्जनान्तरे
जयतु सोऽद्य मन्मनोन्तरे ॥ ३८ ॥

(७) शुद्धविराट्-- लक्ष्मीनायक ते पदाम्बुजे
सक्तोऽयं मम चित्तषट्पदः ।
शान्तो विन्दति शाश्वतं सुखं
नान्यद्वाञ्छति नश्वरं पदम् ॥ ३९ ॥

(८) उपस्थिता-- संसारसरस्वति सारवत्
कंसारिपदाम्बुजसेवनम् ।
पुंसामिति साधुमतं ततः
संसाधय चित्त तदन्वहम् ॥ ४० ॥

(९) हंसी-- एकं ज्योतिर्जयति सकले
तस्मादन्यत्किमपि न परम् ।
तत्र स्वान्तः प्रविश सततं
मोहध्वान्तं त्यजसि विततम् ॥ ४१ ॥

११—तृष्टुप्छन्दसि,

(१) वृता-- कमलनयन करुणासिन्धो
श्रवसि कलय मम विज्ञाप्यम् ।
तव चरणकमलयोर्भक्तिं
वितर विमलसुदृढां नित्यम् ॥ ४२ ॥

(२) उपस्थितम्-- हरे तव पदद्वन्द्वप्रसक्तं
मनो मम यदि द्वन्द्वाप्रसक्तम् ।
कुतो गनिन्द्वतिद्वन्द्वप्रसक्तिः
कुतो मतिसुखद्वन्द्वाप्रसक्तिः ॥ ४३ ॥

(३) शालिनी-- भोभोश्चेतष्षट्पद त्वं शृणूच्चै:
वाचोऽस्माकं ह्यस्ति चेत्ते रिरिंसा ।
भक्त्याऽजस्रं देवदेवस्य विष्णो:
पादाम्भोजं याहि मुक्तान्यसङ्ग: ॥ ४४ ॥

(४) वातोर्मि:-- भोभोस्स्वान्त त्यज संसारचिन्तां
तस्य श्रीश: स्थितिसंहारकर्ता ।
तिष्ठत्यन्यस्तमुपैहि प्रयत्नात्
तत्कारुण्यात्तव निर्वाणसिद्धि: ॥ ४५ ॥

(५) इन्द्रवज्रा-- पद्मेश ते दर्शय पादपद्मे
तत्सारलिट् स्यान्मम चित्तभृङ्ग: ।
अल्पेषु भूरिक्षुदनल्पयत्नोऽ-
प्यप्राप्य कामं वलतेऽतिखिन्न: ॥ ४६ ॥

(६) उपेन्द्रवज्रा-- हरेहरे तेऽद्भुतदिव्यरूपं
विचिन्तयेऽहं हृदि नित्यमेव ।
तवैव कारुण्यवशादयत्ना-
दिदं न यत्नादपि योगिसाध्यम् ॥ ४७ ॥

(७) उपजाति:-- अहो मयि त्वत्करुणा मुरारे
गूढोरुशास्त्रार्थविचारमूढे ।
हृदम्बुजे मे रमया सह त्वं
विक्रीडसे यत्सुभृशं सदैव ॥ ४८ ॥

(८) तोटकं-- एहि ममाद्य हृदम्बुजगेह-
न्यस्तसुवर्णमणीमयमञ्चे ।
श्रीश सहोपविशेन्दिरयोर्व्या
त्वाऽनुसरन्त्वभितः प्रतिहाराः ॥ ४० ॥

(९) स्वागतं-- स्वागतं त्रिभुवनेश तवाद्य
श्रीनिधेऽखिलचराचरधाम्नः ।
एकरूप बहुरूप नमस्ते
दिव्यरूप निगमागमवेद्य ॥ ६० ॥

(१०) मौक्तिकमाला--मस्तकविन्यस्तमणिकिरीटं
गण्डचलत्कुण्डलमणिमीळे ।
कण्ठलसत्कौस्तुभमजितश्री-
मौक्तिकमालोल्लसदुरसं त्वाम् ॥ ९१ ॥

(११) श्रीवृत्तं-- मौक्तिकमालात्विषि वनमाला-
सौरभलोभाद्भ्रमदलिमाला ।
तत्स्मितशोभाशिशिरकटाक्ष-
श्रीधृतसख्या स्वनति सलीलम् ॥ ९२ ॥

(१२) सैनिका-- कङ्कणादिकोल्लसत्करस्फुर-
च्चक्रशङ्खसद्गराभयश्रियम् ।
श्रोणिसूत्रनिर्जितेन्द्रकार्मुकं
हंसकोज्ज्वलाङ्घ्रिमाश्रयेऽच्युतम् ॥ ९३ ॥

(१३) भद्रिका-- स्फुरति हरिरिह श्रिया पुरः
कनकवसनशोभिविग्रहः ।
तरुणतरणिदीधितिस्फुर-
त्सुरपतिमणिशैलराडिव ॥ ९४ ॥

(१४) सुमुखी-- कनकमणीमयपीठतले
स्फुरति तवारुणपादतलम् ।
मुरहर चारु सुमेरुतले
विनिहितविद्रुमपीठमिव ॥ ९५ ॥

(२५) भ्रमरललिता-- कोटीराद्याभरणसमुदये
श्यामाङ्गस्त्वं सकनकवसनः ।
लक्ष्मीकान्त स्फुरसि मणिमये
मेरुत्सङ्गे सतटिदिव घनः ॥ ९६ ॥

(१६) रथोद्धता-- ईदृशं वपुरचिन्त्यवैभवं
हा रमेश तव पार्थसारथे ।
तां दशां कथमवाप संयुगे
श्रान्तवाहपरिसेवनोचिताम् ॥ ९७ ॥

१२—जगतीछन्दसि

(१) जलधरमाला-- श्रीमन्यस्फुरदुरुकोटीरश्री-
भास्वद्दिव्याकृतिरियमम्भोजाक्ष ।
धत्ते शोभां तव नवनीलाब्जाभा
विद्युल्लीवलयितनीलाभ्रस्य ॥ ९८ ॥

(२) पुटः--　　तव मृदुपदपद्मे प्राप्तसङ्गो
विषमविषयभोगे त्यक्तसङ्गः ।
पिबति मधु यथेष्टं निश्चलाङ्गो
ह्यजित हृदयरंङ्गः कोऽपि भृङ्गः ॥ ५९ ॥

(३) वैश्वदेवी--　　ब्रह्मेशेन्द्राद्यैर्भावितं भूतिहेतोः
श्रीभूहस्ताब्जैर्लालितं श्रीपते ते ।
पादाम्भोजं तच्चित्तकासारसीध्नि
स्वामिन् हंसाद्यैरङ्कितं शोभते मे ॥ ६० ॥

(४) भुजङ्गयातं--　　हरे त्वत्पदाम्भोजमम्भोजविद्विट्-
प्रभाभासुरोद्यन्नखश्रीमनोज्ञम् ।
हृदम्भोजमध्ये ममाद्य प्ररूढं
करोतीति नाश्चर्यमाश्चर्यवृद्धिम् ॥ ६१ ॥

(५) मणिमाला--　　पादेऽत्र विदोषा भूमंस्तव योषा
माहात्म्यविशेषान्यान्वेत्ति सदैषा ।
तान्वेत्तुमशेषान् ब्रह्माद्यनिमेषाः
यत्ता न सशेषाः शक्ताः किमु शेषाः ॥

(६) तामरसं--　　मुरहर तावकपादसरोजे
मम चलचित्तमधुव्रतकेलिः ।
जनयति चित्रसरिद्विरवेणीं
कलयति सापि सदातिजडं माम् ॥ ६३ ॥

(७) **नवमालिनी**– जयति तवाङ्घ्रिपञ्जरगतो मे
मुरहर सोऽद्य मानसमरालः ।
परमसुखस्य किं भवति भूयो
विषयविषाशये रतिरमुष्य ॥ ६४ ॥

(८) **कुसुमविचित्रं**– नखमणिदीप्त्या जितविधुलेखे
मुरहरहृत्खे मम विजयेते ।
वनरुहवज्रध्वजमुखरेखा-
रुचिरतले ते पदकमले ते ॥ ६५ ॥

(९) **स्रग्विणी**– यज्ञदानादिहीनस्य दीनस्य मे
श्रीश भावत्कपादारविन्दस्मृतेः ।
साधनं नान्यदस्तीति मन्ये हरे
घोरसंसृत्यकूपारपाराशये ॥ ६६ ॥

(१०) **प्रमुदितवदना**– प्रहसिततरुणारुणाब्जोदयं
प्रमुषितशरणार्थितापत्रयम् ।
प्रभुवर तव नौमि पादद्वयं
प्रतिदिनमविमुक्तधामत्रयम् ॥ ६७ ॥

(११) **प्रभा**– न नखरुचिरियं ध्रुवं श्रीपते
मम हृदयमलं प्रमार्ष्टु ह्यलम् ।
तव पदकमलं जगत्पावनीं
सृजति बत पुनर्वियन्निम्नगाम ॥ ६८ ॥

(१२) **पञ्चचामरं**— हरे तवाङ्घ्रिसन्नखेन्दुचन्द्रिका
हृदम्बरे मम स्फुरत्यहर्निशम् ।
चरन्ति कामलोभमोहतस्कराः
निरुद्यमा विशेषतो विशुष्किताः ॥ ६९ ॥

(१३) **इन्द्रवंशा**— चित्रं चरित्रं तव चित्स्वरूपिण-
स्सान्द्रातपेनाङ्घ्रिनखेन्दुजन्मना ।
हृत्पुण्डरीकं मम यद्विनिर्मलं
विष्वक्सृतानन्दरसं विराजते ॥ ७० ॥

(१४) **वंशस्थवृत्तम्**— अहो महत्याश्रितपक्षपातिता
तवाच्युतोदारमहिम्न ईशितुः ।
प्रपन्नमेनं परिपासि यत्सदा
वसन् हृदब्जे गुणगन्धवर्जितम् ॥ ७१ ॥

(१५) **ततिः (मालतीवा)**अहह फणीन्द्रफणाग्रसीमनि
स्फुटममरेड्य बभूव यत्पुरा ।
जयति तदीश तवाद्य ताण्डवं
मम हि मनोहिफणाग्रसीमनि ॥ ७२ ॥

(१६) **ललिता**— संसारदुर्विषयायामुनह्रदात्
निष्कासयन् मम मनोहिपुङ्गवम् ।
त्वत्पादचिन्तनमहाब्धिसङ्गतं
विष्णो विधेह्यभियमङ्घ्रिमुद्रया ॥ ७३ ॥

(१७) **प्रियंवदा**— जयति मे महति चित्तमन्दिरे
सुदृढभक्तिशुभयष्टिसुन्दरे ।
हरिपदाम्बुरुहसंभृतादरः
कनकहंसकवरस्सनूपुरः ॥ ७४ ॥

(१८) **हतविलम्बितम्**— तव पदाम्बुजपार्श्वचतुष्टये
यदिदमच्युत गुल्फचतुष्टयम् ।
तदवितुं मदभीष्टचतुष्टयं
ध्रुवमभूच्छतचन्द्रचतुष्टयम् ॥ ७५ ॥

(१९) **उज्ज्वला**— हृदि मम जयतीह सुजङ्घयो-
र्युगलमतिरतीशनिषङ्गयोः ।
तव हतकलिकल्मषसङ्घयो-
रजित विहितसुध्यनुषङ्गयोः ॥ ७६ ॥

(२०) **तोटकम्**— कमलामलपाणिसरोजयुगं
गलिताङ्गुलिसन्मणिभूषमलम् ।
रहसीश निषेवत एव सदा
तदिदं तव जङ्घिकयोर्युगलम् ॥ ७७ ॥

(२१) **शमिताक्षरम्**— हरिजानुयुग्म विहरात्र सुखं
मनुजावतारशिशुभावकृतात् ।
तव चङ्क्रमाद्धि वनराजिमिषाद्
घनरोमहर्षमगमद्धरणी ॥ ७८ ॥

(२२) बलोद्धतगतिः— करीन्द्रकरजित्तवोरुयुगलं
विभाति हृदि मे रमेश बहुलम् ।
स्वकैरपि गुणैर्नवाम्बरगुणै-
स्सुपर्णभुजयोस्तपःफलमिदम् ॥ ७९ ॥

(२३) चन्द्रवर्त्म— ध्यातुरस्य नृहरेर्मणिरशना-
दामनद्धपटशोभिकटितटः ।
धातुचित्रकनकाद्रिकटक-
द्भाति चित्तसुवर्त्मनि सततम् ॥ ८० ॥

(२४) मौक्तिकदाम— बिभेति विभो तव नाभिसरोज-
मजस्य चतुर्दशलोकसृजोऽस्य ।
जगत्त्रयसृष्टिनिदर्शनकोश-
निदानमुदीक्ष्य मनो मम हेति ॥ ८१ ॥

१३—अतिजगतीछन्दसि

(१) क्षमा— तनुतरमुदरं वीक्ष्य विश्वम्भरं
कथमिदमिति मा चित्त चिन्तां कृथाः ।
श्रुतिरिह नृहरेः कृत्यमत्यद्भुतं
वदति हि तदिदं किन्तु न स्मर्यते ॥ ८२ ॥

(२) महर्षिणी— तद्गाढं रहसि रमाभुजोपगूढं
भो नाथ त्रिवलिचिताब्धिभङ्गसङ्गम् ।
व्यावल्गत्तरलमणिश्रियोदरं ते
भातीदं मनसि ममेन्द्रनीलशोभम् ॥ ८३ ॥

(३) मत्तमयूरम्— सश्रीवत्साश्रीतरुणीकौस्तुभमेनं
व्योनेवाभ्रच्छेदतडिद्भानुमनोज्ञम् ।
वक्षोदेशं तावकमालोक्य मनो मे
केकानादं मुञ्चति हर्षाद्घनमालिन् ॥ ८४ ॥

(४) नवनन्दिनी (कुटजंवा)—तव बाहुपञ्चफणभोगिचतुष्कं
जयतीश भूषणमणिद्युतिचित्रम् ।
धृतचक्रतोयजवराभयमस्म-
त्पुरुषार्थकोशपरिरक्षणदक्षम् ॥ ८५ ॥

(५) उपस्थितम्— विभाति तव दक्षोर्ध्वारुणकराब्जे
स्वभक्तजनरक्षोद्युक्तमुरुचक्रम् ।
सदैव कमलाक्षोद्यद्विशताभं
त्वदीह मम रक्षोभीममभयाय ॥ ८६ ॥

(६) कुटिलगतिः— विधुरिव शोभते श्रीश वामोर्ध्वके
तव करपङ्कजे पाञ्चजन्यो महान् ।
जयति महारणे जातु यस्य स्वनः
रितजननतोषणः शत्रुत्रद्भीषणः ॥ ८७ ॥

(७) चन्द्रिका— न हि तव वरमुद्रेति वाणी मृषा
वृषभगिरिजुषो यत्सतां द्राक्सदा ।
स्थिरपदयुगदानाय जान्वन्तिके
जयति सदय दक्षेतराधःकरः ॥ ८८ ॥

(८) मञ्जुहासिनी— स्वदक्षिणाधःकरसरोजसंभृता
ह्यभीतिमुद्राऽखिलसुभद्रदायिनी ।
विभाति सेयं तव हरे हृदि स्थिता
निरीक्ष्य यां श्रीर्भवति मञ्जुहासिनी ॥८९॥

(९) मञ्जुभाषिणी— तव को नु वेद भुजवीर्यमद्भुतं
त्रिदशा अमी विमलभक्तिसन्नताः ।
असुराश्च दर्शनत एव संहृताः
समरस्तु तैर्जयति लीलयैव हि ॥९०॥

(१०) रुचिरा— भुजानिमांस्त्रिभुवनरक्षणक्षमा-
नजोत्तमा रहसि रतोत्सवे रमा ।
स्मितोपमै रुचिरपटीरकर्दमै-
र्निजैर्भुजैर्जयति लिम्पती विभोः ॥९१॥

१४—शक्करीछन्दसि,

(१) हंसश्रेणी— स्कन्धासक्तैर्नवविधमणिहारव्रातैः
द्यद्द्योतो जलधिजमणिशोभाहेतुः ।
आकारेण क्रमुकदरविजेता विष्णोः
कण्ठो द्रष्टुः कलयति मम हर्षोद्रेकम् ॥९२॥

(२) कुटिलम्— हरिनीलक्षितिधरशिखरे सन्ध्याभ्रे
यदि चन्द्रद्युतिरतिविमला दृश्येत ।
दरहासद्युतिरधरपुटे वक्त्रे ते
कथमेषा स्मृतिपथमज नागच्छेत्तु ॥

(३) असंबाधा— श्रीशादर्शभे प्रतिफलति कपोले ते
प्रान्तश्रोत्रान्ताभरणमणिवृणिव्यूहे ।
भीतेवाभूच्छ्रीः किमियमधरमुद्रा मे
क्रीडासक्ता वा सरसचरणमुद्रेति ॥९४॥

(४) वसन्ततिलका— नासा तव स्फुरति माधव मामकानि
नानाविधानि दुरितानि दुरुद्धराणि ।
नामाग्निसंज्वलनकृद्धमनी प्रदग्धुं
कामादिवैरिकरियूथवधे शतघ्नी ॥९५॥

(५) लोला— श्रीभूदर्शनलोले भक्तानुग्रहशीले
ताराषट्पदनीले श्वेताम्भोजस्थलीले ।
कृष्णोरुद्युतिजाले कारुण्यामृतशाले
दृश्येते सुविशाले नेत्रे तेऽद्भुतलीले ॥९६॥

(६) इन्दुवदना— श्रीरमण भोस्तरुणस्त्किरणजालैः
भानुरिव भृङ्गरवशोभिनवपद्मम् ।
अक्षि तव हर्षयति शुद्धमतिभेनं
वेदरवसिद्धनवभक्त्यनुवशं माम् ॥९७॥

(७) जगती— अज्ञान् प्राज्ञान् कलयति सुगिरां वेदने
रिक्तान् पूर्णानमलनिजगुणैस्सज्जनान् ।
बद्धान् मुक्तानपि च भवगुणैस्सद्विधौ
मूढान् प्रौढान् मुरमथन कटाक्षस्तव ॥९८॥

(८) अपराजिता— किमु करिकलिते कृपाम्बुधिर्वीचिके
किमु लिखितजये विमुक्तिपताकिके ।
चलदलिमिलिते स्फुटे किमम्बुजे
किमञ्चित नयने तवोज्ज्वलतारके ॥९९॥

(९) वसुधा— मधुराधरमीक्ष्य गतं श्रुतेः सविधं
कमलामवलोक्य ततो ह्रियाऽपगतम् ।
विहितं कृतमीश तवाक्षितारकया
विजने किल वक्तुमभीप्सितं ह्युचितम् ॥

(१०) ध्रुवम्— चरणरतिं विसृज्य विषयानटतो
ह्यतिचपलस्य दुर्धरजवस्य सदा ।
मम मनसो रमेश तव वज्रदृढं
भवतु कृपानिधेऽक्षियुगलं निगलम् ॥१०१॥

(११) प्रहरणकलिका— क्षणमिह शरणार्थिनि भवतरणे
शुभगुणवरुणालय धृतचरणे ।
कुरु मयि तरुणाम्बुजदलरुचिरे
तव नवकरुणारसभरितदृशौ ॥१०२॥

१५—अतिशक्करीछन्दसि.

(१) कामक्रीडा— देव भ्रूभङ्गस्ते सत्यं सृष्टिस्थित्यन्तादीना-
मेकः कर्ता नित्यं लोकैः साकं लोकेशादीनाम् ।
ब्रह्मेशाद्या ये सृष्ट्यन्तादिप्वत्यन्तासक्ता-
स्तस्यैवाज्ञामिज्ञा राज्ञो यद्वद्भृत्यास्ते विष्णो ॥

(२) शशिकला— विकचकुवलयसरुचि निटिलतटं
स्फुरति पुरहरविजयविशिख तव ।
निकटमणिमयमकुटमहसि बला-
र्यसितमणितटमिव वरसुरगिरेः ॥१०४॥

(३) सक्— निटिलगलितकुटिलचिकुरनिकरं
विपुलनयनविजितविकचकमलम् ।
हसितसुपरिहसितमृदुशशिकलं
स्फुरति मदनजनकवदनमतुलम् ॥१०५॥

(४) मणिगणनिकरम्—प्रदिशति मम तव सदय तदतसी-
स्तवकगतमधुपततिरुचिरमिदम् ।
निटिलतटघटितसृगमदतिलकं
मकुटगलदसितमणिकिरणधिचम् ॥१०६॥

(५) चन्द्रकान्ता— नो तवैतल्ललाटं श्रीशाष्टमीचन्द्रखण्डं
नो मृगीनाभिपुण्ड्रश्चान्द्रो मृगोत्तिक्षुधोत्थः ।
नो किरीटान्तसक्तास्तत्कान्तिकान्तालकानाः
मेरुशृङ्गान्तरूढा दूर्वाङ्कुरा एव नूनम्॥१०७

(६) मालिनी— शिरसि मकुटमेतत्कृष्ण ते रत्नचित्रं
नहि नहि किमु तर्हि स्वाक्षितृप्तयै ध्रुवं तैः ।
बलभिदुपलशैलस्याग्रतो मेरुशृङ्गं
मणिमयमुपनीय क्षिप्तमस्वप्नसङ्घैः ॥१०८॥

(७) **चन्द्रलेखा**– दर्शंदर्शं यदेतत्त्वन्मातरो बालभावे
कौसल्याद्याः कृतार्थाः स्वानन्दसिन्धौ निमग्नाः ।
तत्ते वक्त्रं हृदब्जे सञ्चित्यसञ्चित्य नित्यं
स्वामिन्नत्रैव पश्याम्यानन्दसिन्धुस्वरूपम् ॥१०९

(८) **ऋषभः**– कमला हरे तव सरोजदलायताक्षं
मणिकुण्डलद्वितयशोभितकर्णयुग्मम् ।
पिबतीव भाति मधुरस्मितशोभिगण्डं
वदनं दृशा मदनकार्मुकभासुरभ्रु ॥११०॥

(९) **एला**– दशनांशुभिर्दरमुकुलमिव निमेषात्
मणिभूषणद्युतिभिरथ पुनरतीव ।
परिदृश्यते विकसितमिव तव पार्श्वे
कमलं करे वरद जलधिवरपुत्र्याः ॥१११॥

(१०) **रमणीयकम्**– देवदेव तव दिव्यतनुद्रुममाश्रिता
श्रीलता जयति पाणिपदाधरपल्लवा ।
कर्णपर्णकुसुमस्तबकायितभूषणा
केशभृङ्गपृथुलस्तनसत्फलशोभिता ॥११२॥

(११) **नलिनी**– ध्रुवमीश न सा कमला स्थिरदीप्तिमती
तडिदेव तवाम्बुदनीलतनोस्सविधे ।
घनदीप्तिरपि क्षणदीप्तिरिति प्रथिता
किमहं त्विति खेऽभ्रतपस्सफला चरति ॥११३॥

(१२) प्रभद्रकं (सकेसरंवा)– अजित तडिल्लतेयमिति चेन्न सा स्थिरा
प्रविमलतारकेति तु न सा निशाक्षये ।
कनकलतेति वक्तुमयि सा न चेष्टते
स्फुरति तवान्तिकेऽत्र कमलेव सा सदा ॥११४॥

१६—अष्टिच्छन्दसि.

(१) वाणिनी– अज मम दैन्यमीक्ष्य करुणारसार्द्रचित्ता
श्रितजनवत्सलाऽद्य वदतीव कर्णमूले ।
तव कमलाऽरविन्दनयनाऽऽशु पादमूले
पतितमिमं कृपालय निरीक्ष्य पालयेति ॥११५॥

(२) पञ्चचामरम्– सदा वसन् सदन्तिके हरेऽम्बुजेक्षण क्षणान्
मुदा नयामि यामि नो मदान्धमन्दिरं मुधा ।
अनुक्षणं त्वदीक्षणप्रतीक्षणात्तजागरः
सदा हृदा स्मरामि ते मुखारविन्दमादरात् ॥११६

(३) मणिकल्पलता–तव घननीलदेहदक्षेतरपार्श्वगता
वरदकुटुम्बलोज्ज्वलश्यामलदेहरुचिः ।
अलिरुचिरालिकाऽद्य सत्पल्लवरम्यशया
विपुलरसालपार्श्वमल्लीव विभाति मही ॥११७॥

(४) अश्वगतिः– श्रीधर साऽवरदिव्यसुधारसपानरता
भूरिह पश्यति भूरितृषेव मुखेन्दुममुम् ।
स्वीयकराम्बुजविभ्रमकैरवतोषदया
सुस्मितचन्द्रिकयोज्ज्वलकोमलदेहलता ॥११८॥

(५) वृषभगजम्— श्रीरिव भूरपि स्फुरति मणिगणखचितैः
स्वर्णविभूषणैरपि वरद विमलगुणैः ।
भाति भिदा तयोस्तु तनुवसनकरलस-
द्विभ्रमपङ्कजद्युतिततिभिरतितराम् ॥११९॥

१७—अत्यष्टिच्छन्दसि.

(१) मन्दाक्रान्ता— श्रीभूदेव्यौ रुचिरमकुटीवज्रताटङ्कबाली-
पालीनासाभरणवलयव्रातकेयूरकान्त्या ।
हारश्रेणीतरलरशनाहंसमञ्जीरदीप्त्या
ध्वस्ताध्वान्ते मनसि गम ते पार्श्वयोरीश भातः ॥

(२) पृथ्वी— श्रिया च धरया त्वया हृदयमन्दिरं मे सदा
विभाति नृहरे यथा न हि भुवा दिवा चाब्धिना
जगन्न च दिनश्रिया क्षणदया च हेमाद्रिणा
न च प्रथमसन्ध्यया चरमसन्ध्ययाऽह्ना तथा ॥१२१

(३) नर्कुटकम्— त्रिभुवनदेह देव रमयां धरया च सदा
विहर पयोब्धिमध्य इव मे हृदयाम्बुरुहे ।
अलमितरेण तेन भवसिन्धुमहोर्मिमयः-
कणगणसंमितेन भुवि कामशतेन मम ॥१२२॥

(४) कोकिलम्— त्वमिह मनोम्बुजे मम पयोम्बुधिकन्यकया
विहर भुवा च भो विधिभवार्चितपाद सदा ।
वद मदपेक्षितं किमु ततोऽधिकमाप्यतमं
जगति यतो भवेदिह परत्र च भूरि सुखम् ॥

(५) हरिणी— मुखमिहभुजाभ्रो भूमौ विभाति यतस्त्रयी
पुरुषवपुषो बाहू क्षत्रं यतो जगतोऽवनम् ।
भवति तदिमा ऊरू वैश्यस्तदैव यतःकृषिः
जयति चरणौ शूद्रो येन स्थितं परिचर्यया ॥

(६) शिखरिणी— अभूत्प्राणाद्वायुः पुरुषवर ते दैवतपते
मुखादिन्द्रो वह्निर्वरद शिरसो द्यौश्च जनिताः ।
श्रुतेराशा नाभ्याः खमपि मनसश्चेन्दुरभव-
त्पदाभ्यां जज्ञे भूरपि च नयनादभ्वरणिः ॥

(७) षट्चरणकम्—अनुदिनमच्युतान्तिकलसत्कलत्रयुगलः
प्रणयसुरभिभिर्दृढनिबद्धपादयुगलः ।
मम हृदि निश्चलेऽत्र निवसन्गृहाण महितां
सदय समर्हणां सभयभक्तिकम्पविहिताम् ॥१२६

(८) वंशपत्रपतितम्—आसनमाश्रयस्य जगतां कथमिदमिति मे
मानसमेति भीतिमनिशं मणिमयमपि तत् ।
भक्त्युपनीतमल्पमपि तत्प्रियमिति भवतो
वेद्मि मतं ततोऽर्पितमदः शुभगुणजलधे ॥१२७॥

(९) पञ्चचामरम्— हरे तवार्घ्यमर्पयन् करद्वये मुदा सदैव
रथाङ्गशङ्खपङ्कजादिरेखिका विलोकयामि ।
पदोश्च पाद्यमर्पयन् स्पृशामि तत्तले पटेन
तयोस्सुधाशनिध्वजाङ्कुशादिरेखिका दृशा च ॥

१८—धृतिच्छन्दसि.

(१) अलसा— इदमिदमुपनीतमन्यज्जलं स्वच्छमाचम्यता-
मज मितविभवेन तूर्णं मणीपीठमागम्यताम् ।
स्नपनकनकभाजनस्थैर्घृतैस्सत्पयो-
दधिघृतमधुशर्कराद्यैर्जलैश्चाभिषेकोऽस्तु ते ॥१२९

(२) कुसुमितलतावेल्लिता— वर्षाकालाभ्रस्तनितसुभगैर्वाद्यशब्दैः सुराणां
केकासंनादस्मरणजनकैस्स्तोत्रनादैर्मुनीनाम् ।
स्पष्टोच्चारेण श्रवणमधुरैर्वेदघोषैर्द्विजानां
स्वामिन् मत्स्वान्ते जयतु सततं तेऽभिषेकोत्सवोयम्॥

(३) सुधा— सदास्नातो वासोभिरपि मणिभास्वद्भूषणशतैः
वरैर्गन्धैर्माल्यैश्च सुरुचिरमाल्यादिरचितैः ।
तथा धूपैर्दीपैश्च बहुविधभक्ष्यान्नामृतरसैः
मम स्वान्ते शान्तेऽत्र विहर सुतुष्टः सन्नरहरे॥१३१

१९—अतिधृतिच्छन्दसि.

(१) मेघविस्फूर्जिता— यथा सद्यो हृद्यो दिवि भुवि भवेत्सर्ववाद्यप्रणादो
यथा स्युर्द्रग्देवा मुकुलितकरा ब्रह्मरुद्रेन्द्रपूर्वाः ।
यथा सर्वाङ्गानां वरद युगपद्दर्शनं ते मम स्यात्
तथा भक्त्युद्रेकाज्जयतु सततं देव नीराजनं ते ॥

(२) शार्दूलविक्रीडितम्— स्तुत्वा स्तोत्रशतैः प्रदक्षिणनमस्कारांश्च कृत्वा मुहु-
स्तन्न्यूनाधिक्योस्समीकरणमप्याराधने प्रार्थयन् ।
तत्सर्वं च हरे मरुत्कृतमिति त्वत्प्रीतये चिन्तयन्
भक्त्या नित्यमनेन मोदमुपयाम्यन्यन्न मे वाञ्छितम्॥

२०—कृतिच्छन्दसि,

(१) सुवदना.

देव त्वत्तोऽस्य सर्गस्थितिलयनियतिज्ञानादि निखिलं
बन्धो मोक्षश्च नित्यं विधिगरुडफणिन्यक्षादिजगतः ।
तस्य श्रीशस्य विष्णोस्तव शुभचरणौ प्राप्तोऽस्मि शरणं
भक्त्या भृत्योऽस्मि मृत्योर्भयमपि नहि मे क्वास्त्यन्यजभयम् ॥१३४॥

(२) वृत्तनाम.

देवदेव केशवादिपूरुषेश माविधीशवीशवन्द्य
मानभव्य नव्यनीरजोरुगर्वलोपिरम्यपादयुग्म ।
त्वां नमामि साधुसेव्य दिव्यनीरदाभदेह सर्वदैव
देहिदेहि ते पदाब्जभक्तिमेव मुक्तिहेतुमच्युतेति ॥१३५॥

२१—प्रकृतिच्छन्दसि,

(१) स्रग्धरा.

देहोऽत्यल्पोऽस्य चेतस्त्वतिचलमवशान्येव पञ्चेन्द्रियाणि
स्वामिन् धीरप्यसूक्ष्मा गतिरपि गहना कर्मणस्तद्विचारे ।
नाहं शक्तोऽस्मि कर्तुं किमुत सुरगुरो यद्यमुष्मिन् दया ते
पादाक्रान्ते प्रसीद प्रदिश पदयुगे भक्तिमेकां विशुद्धाम् ॥१३६॥

२२—आकृतिच्छन्दसि,

(१) प्रभद्रकम्.

देव तवाच्युताङ्घ्रियुगलं सदा हृदि विचिन्तयन् सुविमलं
शाश्वतसंविदादिसुगुणान् यथामति विचारयन् दिनगणान् ।

श्रीश नयामि चेदलमलं क्षितावपि ममाद्य जन्म सफलं
नो यदि तद्द्वयं सुविपुले त्रिविष्टपतलेऽपि जन्म विफलम् ॥१३७॥

२३—विकृतिच्छन्दसि,

(१) अश्वललितम्.

तव जलजातजातगरुडद्विजिह्ववरशर्ववासवमुखाः
निखिलसुरास्समेत्य बहुशो विचार्य चरणाब्जरेणुविभवम् ।
त्वयि विपुलां रतिं दधति ते तदप्यहह तारतम्यमतुलं
जयति सुरेषु न त्वयि हरे तदेतदज वेत्तृबुद्धिजनितम् ॥१३८॥

(२) मत्ताक्रीडम्.

नाभीसम्भूतस्तेऽजो बत सृजति भुवनमचरचरमयं
वक्त्रज्जातः शक्रो वहेरनुभवति महितमखविहितहविः ।
नेत्रोत्पन्नस्सूर्योऽजस्रं दिवि किरति तरुणकिरणसमुदयान्
चित्तोद्गीर्णश्चन्द्रो नृणां हृदि वमति विषमशरशरनिचयान् ॥१३९॥

२४—सङ्कृत्यां छन्दसि,

(१) तन्वी.

अस्तु समस्तं गृहवनवनिताज्ञातिसुतप्रियपरिजनबृन्दं
मास्तु ममात्र स्वमतिरज भवन्यस्तनिजस्थितिविलयविसर्गे ।
अस्त्विह देहे परगृह इव मे भीतिरहंमतिरभयद मास्तु
प्रीतिरिहास्तु स्थिरचरविषये विस्मृतिरत्र तु तव मम मास्तु ॥१४०॥

२५—अतिकृत्यां छन्दसि,

(१) क्रौञ्चपदा.

देव ममैतत्सर्वमभीष्टमसुरतिमिरहर तव गुरुकृपया
लभ्यमसौ च प्रीतिकरोरुशुभचरितहृषित निजगुरुकृपया ।
सा च तवेश प्रीतिबलेन जगति भवति बत विबुधवरगुरो
श्रीश ततोऽहं यामि तवैव चरणयुगलमिह शरणमव विभो ॥१४१॥

२६—उत्कृत्यां छन्दसि,

(१) भुजङ्गविजृम्भितम्.

पद्मेशाहं पापासक्तः क्षणमपि सुजनमनुस्मरन् नहि श्रुतवान् हितं
कामक्रोधव्याव्याविष्टो हितमिदमहितमिदमिति स्वयं च न बुद्धवान् ।
अज्ञानाख्ये गाढध्वान्ते भवगिरिकुहरतलगतो गतिं च न लब्धवान्
कारुण्याब्धे वीक्षाशक्त्या शरणद चरणनिपतितं समुद्धर मां विभो॥१४२

(२) अपवाहाख्यम्.

एषा वेङ्कटकविवरवदनजनितफणितिमयसमसुवृत्तानां
माला सद्धृदयकमलविहरदमरवरदयितसुगुणमुक्तानाम् ।
यस्त्वेतां सततमुषसि हृदि कलयति मुहुरपि च बत तदर्थानां
चर्चामुद्वहति स रतिमजितचरणनलिननखमणिवृणौ धत्ते ॥१४३॥

इयं वेङ्कटसूरिविरचिता समवृत्तमाला समाप्ता.

॥ श्री कृष्णार्पणमस्तु ॥



I - 1516

ಪುಸ್ತಕದ ಸಂಖ್ಯೆ.....